जात्यन्तरासम्भवात्। तदन्तःपातित्वे च पूर्ववदेवागम्यत्वं प्रतिलोमजत्वे तु तासान्नितरामगम्यत्वम्। अतः पुरुषान्तरोपभोगे तासान्निन्दितकर्माभ्यासेन पातित्यात् पतितसंसर्गस्य च निषिद्धत्वान्न सकलपुरुषोपभोगयोग्यत्वम्। सत्यमेवम्। किन्त्वत्र स्वैरिण्याद्युपभोगे पित्रादिरक्षकराजदण्डभयादिदृष्टदोषाभावाद्गम्यत्ववाचोयुक्तिः। दण्डाभावस्त्ववरुद्धासु दासीष्विति नियतपुरुषपरिग्रहोपाधितो दण्डविधानात्तदुपाधिरहितास्वर्थाद्गम्यते। स्वैरिण्याद्यानां पुनर्दण्डाभावो विधानाभावात् "कन्यां भजन्तीमुत्कृष्टं न किञ्चिदपि दापयेदिति" लिङ्गदर्शनाच्चावगम्यते। प्रायश्चित्तन्तु स्वधर्मस्खलननिमित्तं ब्राह्मणानामिव तेषां वाऽविशेषाद्भवत्येव। यत् पुनर्वैश्यानाञ्जात्यन्तरासम्भवेन वर्णान्तःपातित्यमनुमानादुक्तम् वेश्या वर्णानुलोमाद्यन्तःपातिन्यो मनुष्यजात्याश्रयत्वात् ब्राह्मणादिवदिति। तन्न कुण्डगोलकादिभिरनैकान्तिकत्वात्। अतो वेश्याख्या काचिज्जातिरनादिर्वेश्यायामुत्कृष्टजातेः समानजातेर्वा पुरुषादुत्पन्ना पुरुषसंयोगवृत्तिर्वेश्येति ब्राह्मण्यादिवल्लोकप्रसिद्धिबलादभ्युपगमनीयम्। न च निर्मूलेयम्प्रसिद्धिः। स्मर्य्यते हि स्कन्दपुराणे "पञ्चचूडा नाम काश्चनाप्सरसस्तत्सन्ततिर्वेश्याख्या पञ्चमी जातिरिति। अतस्तासान्नियतपुरुषपरिणयनविधिविधुरतया समानोत्कृष्टजातिपुरुषाभिगमने न दृष्टदोषो नापि दण्डस्तासु चानवरुद्धासु गच्छतां पुरुषाणां यद्यपि न दण्डस्तथाप्यदृष्टदोषोऽस्त्येव "स्वदारनिरतः सदेति" नियमात्। "पशुवेश्याभिगमने प्राजापत्यं विधीयते" इति प्रायश्चित्तस्मरणाच्चेति निरवद्यम्। अवरुद्धासु दासीष्वित्यनेन दासीस्वैरिण्यादिभुजिष्याभिगमने दण्डं विदधतस्तास्वभुजिष्यासु दण्डो नास्तीत्यर्थादुक्तम्। तस्यापवादमाह "प्रसह्य दास्यभिगमे दण्डो दशपणः स्मृतः। बहूनां यद्यकामासौ चतुर्विंशतिकः पृथक्" या०। पुरुषसम्भोगजीविकासु दासीषु स्वैरिण्यादिषु शुल्कदानविरहेण प्रसह्य बलात्कारेणाभिगच्छतो दशपणो दण्डः। यदि बहवः अकामामनिच्छन्तीमपि बलात्कारेणाभिगच्छन्ति तर्हि प्रत्येकञ्चतुर्विंशतिपणपरिमितन्दण्डं दण्डनीयाः। यदा पुनस्तदिच्छया भाटिन्दत्त्वा पश्चादनिच्छन्तीमपि बलात् व्रजन्ति तदा तेषामदोषः यदि व्याध्याद्यभिभवस्तस्या न स्यात् "व्याधिता सश्रमा व्यग्रा राजकर्मपरायणा। आमन्त्रिता चेन्नागच्छेददण्ड्या वड़वा स्मृतेति" नारदवचनात्। किञ्च। "गृहीतवेतना वेश्या नेच्छन्ती द्विगुणं वहेत्। अगृहीते समन्दाप्यः पुमानप्येवमेव च" या०। यदा तु शुल्कं गृहीत्वा सुस्थापि तं नेच्छति तदा शुल्कं द्विगुणं दद्यात् तथा शुल्कं दत्त्वा स्वयमनिच्छतः स्वस्थस्य पुंसः शुल्कहानिरेव "शुल्कं गृहीत्वा पण्यस्त्री नेच्छन्ती द्विगुणं वहेत्। अनिच्छन् दत्तशुल्कोऽपि शुल्कहानिमवाप्नुयादिति तेनैवोक्तत्वात्। तथान्योऽपि विशेषस्तेनैव दर्शितः "अप्रयच्छंस्तथा शुल्कमनुभूय पुमान् स्त्रियम्। आक्रमेण च सङ्गच्छन् तथा दन्तनखादिभिः। अयोनौ चाभिगच्छेद्यो बहुभिर्वाभिवासयेत्। शुल्कमष्टगुणं दाप्यो विनयन्तावदेव तु। "वेश्या प्रधाना यास्तत्र कामुकास्तद्गृहोषिताः। तत्समुत्थेषु कार्य्येषु निर्णयं संशये विदुरिति"। "गणान्नं गणिकान्नञ्च" अभक्ष्याभक्षकथने मनुना तदन्नं निषिद्धम्।

**गणिकारिका** स्त्री गणनं गणिः गण-इन् तं करोति अण् गौरा० ङीष् गणिकारी स्वार्थे के ह्रस्वः, कृ-ण्वुल् वा कापि अत इत्त्वम्। १(गणियारी) द्रुमे अमरः। "अग्निमन्थो जयः स स्याच्छ्रीपर्णी गणिकारिका। जया जयन्ती तर्कारी नादेयी वैजयन्तिका। अग्निमन्थः श्वयथुनुद्वीर्य्योष्णः कफवातहृत्। पाण्डुनुत् कटुकस्तिक्तस्तुवरो मधुरोऽग्निदः" भावप्र०।

**गणिकारी** स्त्री गणिं गणनं करोति कृ-अण् उप० स० गौरा० ङीष्। क्षुद्रगणिकारिकायाम् राजनि०।

**गणित** न० गण-भावे क्त। १गणने "पारेपरार्द्धं गणितं यदि स्यात्" नैष०। ग्रहाणां २गतिस्थित्यादिगणने यथा गणिताध्यायः। करणे क्त। ३व्यक्ताव्यक्तरूपे अङ्कशास्त्रे "द्विविधगणितमुक्तं व्यक्तमव्यक्तयुक्तं तदवगमननिष्ठः शब्दशास्त्रे पटिष्ठः। यदि भवति तदेदं ज्यौतिषं भूरिभेदं प्रपठितुमधिकारी सोऽन्यथा नामधारी" सि०शि०। कर्म्मणि क्त। ४कृतगणने संख्याते त्रि० अमरः "विद्यां प्रमादगणितामपि चिन्तयामि" चौरप० गणनया आगते ५त्रैराशिकफलादौ (कालि) "चेत्रस्य पञ्चकृतितुल्यचतुर्भुजस्य कर्णौ ततश्च गणितं गणक ! प्रचक्ष्व"। "सूर्य्योन्मितस्य गणितं वद तत्र किं स्यात्" लीला०।

**गणिताध्याय** पु० गणितम् ग्रहगतिस्थित्यादिगणनमधीयतेऽत्र। अधि+इ-आधारे घञ्। सि०शि०ग्रन्थान्तर्गते अध्या-